International Journal of Sanskrit Research 2023; 9(5): 17-18

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(5): 17-18
© 2023 IJSR
www.anantaajournal.com
Received: 17-06-2023
Accepted: 21-07-2023

**डॉ. उमेशशुक्लः**
असिस्टेन्ट प्रोफेसर, व्याकरण विभागस्य, श्रीमती लाड देवी शर्मा पंचोली आदर्श संस्कृत महाविद्यालयः, वरून्दनी भीलवाड़ा, राजस्थानम्, भारत

**Corresponding Author:**
**डॉ. उमेशशुक्लः**
असिस्टेन्ट प्रोफेसर, व्याकरण विभागस्य, श्रीमती लाड देवी शर्मा पंचोली आदर्श संस्कृत महाविद्यालयः, वरून्दनी भीलवाड़ा, राजस्थानम्, भारत

# व्याकरणशास्त्रे दर्शनत्वविवेचनम्

**डॉ. उमेशशुक्लः**

**DOI:** https://doi.org/10.22271/23947519.2023.v9.i5a.2202

**सारांश**
अस्मिन् निबन्धे व्याकरणशास्त्रस्य दर्शनत्व विषये सम्यग् रुपेण वर्णनमस्ति। वेद एव मोक्षस्य साधकमस्ति। वेदस्य षड् अंगानि सन्ति। शिक्षा, कल्पः, निरुक्तम्, छन्दः, ज्योतिषम्, व्याकरणम्। भगवता भाष्यकृता पतंजलिना षट्सु अङ्गेषु व्याकरणं प्रधानमस्ति। प्रधाने च कृतो यत्नः फलवान् भवति इति। व्याकरणस्य स्वरूपं किं दर्शनं किं अनयोः विषये सम्यग् रुपेण वर्णनमस्ति। दृश्यते आत्मतत्त्वं विचार्य्यते येन तद्दर्शनमिति निर्वचनेन विवेचनमस्ति। भारतीयदर्शनानामेव स्वभावो यत् सर्वेषां जीवानां कृते कल्याणमार्गं भवेत् । एकैव वाग् द्विविधास्ति व्याकृताव्याकृताभेदेन । तत्र व्याकृतापदेन पश्यन्ती, मध्यमा, वैखरीणां ग्रहणं भवति। दर्शनशब्दो द्विविधः भावसाधनः करणसाधनश्च। तत्र भावसाधनत्वे दृष्टिरित्यर्थस्तस्यावबुध्यते। करणसाधनत्वे तु दृश्यते प्रत्यक्षीक्रियतेन तु अनुमीयते नाऽपि शब्दजन्यबोधविषयीक्रियते अनेनेति व्युत्पत्त्या दर्शनसाधनमित्यर्थः। इत्यदीनां विषये सम्यग् रुपेण वर्णनमस्ति।

**कूटशब्द :** शिक्षा, कल्पः, निरुक्तम्, छन्दः, ज्योतिषम्, व्याकरणम्

**प्रस्तावना**
सनातनधर्मस्य सर्वविधमंगलसाधकं च साहित्यं मन्त्रब्राह्मणात्मको वेद एव। तस्याङ्गतया व्याकरणं प्रधानमस्ति। तथाहि षडङ्गविदस्तधा धीमहे इत्युक्तया ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च, इति महाभाष्योक्त्या च वेदस्य षट्संख्यकानि अङ्गानि सन्ति गोपथब्राह्मणे उक्तम्। तथा च शिक्षा, कल्पः, निरुक्तम्, छन्दः, ज्योतिषम्, व्याकरणं च प्रसिद्धमेव। उक्तञ्च–

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्म लोके महीयते।।इति।।

अपरं चास्य व्याकरणस्याङ्गान्तरापेक्षया प्राधान्यमप्युक्तं भगवता भाष्यकृता प्रधानं च षट्सु अङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति इति।
एवं च यथा शरीरस्य रक्षार्थमङ्गानां महती आवश्यकतास्ति तथैव वेदानां स्वरूपस्य तदर्थस्य चावगमाय शिक्षाद्यङ्गानां महत्प्रयोजनम् अस्ति, किं पुनस्तत्र मुखस्थानीयस्य व्याकरणस्य।
अथ किमिदं व्याकरणम् किञ्च तस्य दर्शनत्वम्। व्याकरणमस्ति वेदस्यान्यतमं महनीयमङ्गं सप्रयोजनं चेति ज्ञातम्। इदानीं तल्लक्षणनिर्वचनेन विशेषतः स्वरूपं जिज्ञासितमस्ति। तन्निरूप्य दर्शनस्य लक्षणं व्याकरणे दर्शन–त्वसंघटनं च विधास्यते।
तत्र व्याक्रियन्तेऽसाधुशब्देभ्यः साधुशब्दाः पृथक्क्रियन्ते (पृथक्कृत्य ज्ञायन्ते ) येन तद्व्याकरणमिति व्युत्पत्त्या असाधुशब्दावधिकसाधुशब्दकर्मक–पृथक्कृतिपूर्वकसाधुशब्दविषयकज्ञानकरणं व्याकरणमित्यर्थो योगशक्त्या लभ्यते।
यथा–गावी, गोणी, गोते इत्यादिभ्यो साधुशब्देभ्यो गो इति साधु शब्दस्य पृथक्कृत्य बोधनं व्याकरणशास्त्राधीनम्।
पृथक्कृतिश्च गच्छतीति गौः गमेर्डोप्रत्ययः कर्तरि औणादिकः इत्येवं प्रकृतिप्रत्यय वश्लेषणपूर्विका।
एवं च साधुशब्दबोधकशास्त्रत्वं शब्दगतसाधुत्वबोधकशास्त्रत्वं वा व्याकरणस्य लक्षणं पर्यवसितम्। इतरत् सर्वमसाधुशब्दज्ञानप्रकृतिप्रत्यया–दिज्ञानपरिचायककोटावेव प्रविष्टम्, न तु लक्षणशरीरे निविष्टम्।

डित्थादिशब्दे प्रकृत्यादिकल्पनायाः प्रायोगऽदर्शनात् लक्ष्यलक्षणे व्याकरणमिति व्याचक्षाणेन भाष्यकृताऽपि लक्ष्यगतसाधुत्वलक्षकशास्त्रं व्याकरणमिति प्रत्याय्यते, येन च पूर्वोक्तं लक्षणं साधु समर्थ्यते। 'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः' इत्युक्त्या वाक्पदीयकृताऽपि उक्ततल्लक्षणे साधुसम्मति प्रकाश्यते।

अथ व्याकरणस्य स्वरूपपरिचायनान्तरं दर्शनत्वं विमर्शनीयमस्ति। तत्र दृश्यते आत्मतत्त्वं विचार्य्यते येन तद्दर्शनमिति निर्वचनेन आत्मतत्त्वविचार–कशास्त्रत्वं दर्शनलक्षणं पर्यवस्यति भारतीयदर्शनानामेष स्वभावो यत् सर्वेषां जीवानां कृते कल्याणमार्गं दर्शयेत् स च मार्ग आत्मतत्त्वविवेचनात्मक एव। तथा च श्रुतिः[1]– तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय इति। एतदनुगुणसम्– आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः इतिश्रुतिरात्मसाक्षात्कारलक्षणं मोक्षं तदुपाभूय श्रवणादिकञ्च प्रतिपादयन्ती साक्षादेव दर्शनपदव्यपदेश्यतां भजते। एवमेव–सर्व खल्विदं ब्रह्म[2] अयमात्मा ब्रह्म[3] इत्याद्याः श्रुतयो ब्रह्मसूत्राणि स दर्शनपदेन व्यवह्रियन्ते। एतद्विषये व्याकरणं पश्चात्पदं न भवति।यतश्चास्तीदमपि आत्मतत्त्वविवेचनम्। उक्तञ्च–

दृष्ट्वा रूपे व्याकरोत् सत्त्यानृते प्रजापतिः।
आश्रद्धमनृते दधाच्छ्रद्धां सत्ये प्रजापतिः।।[4] इति।।

प्रजापतिः शब्दोपादनकसृष्टिविधाता वैयाकरणः सम्मिलिते सत्यानृते पृथक्कृत्य परमार्थभूते सत्ये वस्तुनि श्रद्धामसत्येऽनात्मनि अश्रद्ध प्रत्यतिष्ठिपत् इत्यर्थिकयाऽनयाश्रुत्या सत्यासत्यविवेचनलक्षणं दर्शनत्वं व्याशकरणस्य सुस्पष्टं प्रतिपाद्यते।

किञ्च प्रकृतिप्रत्ययौ असत्यौ तदपेक्षया पदानि ततोऽपि वाक्यानि पश्यन्त्यादिकं च सर्वजगदसत्यम्। सर्वापेक्षया पाराख्यं वाग्ब्रह्म सत्यमित्येवं निगूढं तात्पर्यम्। एवमेव– नामरूपे व्याकरणवाणी इति श्रुतिरपि संश्लिष्टयोः शब्दार्थयोः पृथक्कृतिं बोधयन्ती व्याकरणस्य सत्यासत्यविवेचनलक्षणदर्शनत्वं प्रकाशयति। वाग्वै ब्रह्म वाग्घिब्रह्म ते मृत्युमतिवर्तन्ते ये वै वाचमुपासते इत्याद्याः श्रुतयोऽपि वाचो व्याकृतिरूपोपासनया व्याकरणस्य दर्शनत्वं सम्यक् प्रतिपादयन्ति।

एकैव वाग् व्याकृताव्याकृताभेदेन द्विविधास्ति। तत्र व्याकृतापदेन पश्यन्ती, मध्यमा, वैखरीणां ग्रहणम्। अव्याकृतापदेन सर्वधर्मरहिताया नित्यायाः पराख्यवाचो ग्रहणमिति सिद्धान्तोऽस्ति।

अत्र हि व्याकरणदर्शनमित्यस्य कोऽर्थः? एवं प्रश्ने तद्घटकदर्श–नशब्दस्यार्थः प्रथमं निर्णीयते अयं दर्शनशब्दो भावसाधनः करणसाधनश्च। तत्र भावसाधनत्वे दृष्टिरित्यर्थस्तस्यावबुध्यते। करणसाधनत्वे तु दृश्यते प्रत्यक्षीक्रियते न तु अनुमीयते नाऽपि शब्दजन्यबोधविषयीक्रियते अनेनेति व्युत्पत्त्या दर्शनसा–धनमित्यर्थः। एवं सति यैर्यैरुपयैर्दृश्यते ते सर्वेऽपि उपाया दर्शनपदव्यपदिष्टा भवितुर्महन्ति। भावसाधनत्वे तु–

श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।
मत्वा च सततं ध्येय एते दर्शनहेतवः।।[5]

इत्युक्त्या श्रुतवाक्यश्रवणमन्तरा यत् किञ्चिद् ग्रथ्यमानं वस्तु दर्शनमेव नहि भवितुमर्हतीति कथङ्कारं दर्शनपदव्यपदिष्टानां दर्शनपदव्यवहार्यता इति चेत्, उच्यते सर्वेषामपि दर्शनानामुद्भावकानां चेतसि सैव भगवती श्रुतिः साक्षात् परम्परया वा स्वकीयं कार्य विदधती वर्तत एव। तामन्तरा तस्याश्चित्तः प्रकाशस्य खपुष्पायमाणत्वात्। एवं च दर्शनहेतूनां दर्शकं प्रतिपादकं वा शास्त्रं लक्षणया दर्शपदभाग भवेदेव किमुत करणसाधनत्वे। तथा च व्याकरणमेव दर्शनमिति कर्मधारये सर्वं व्याकरणं दर्शनमेव भविष्यति। भावसाधनत्वे षष्ठि–समासे व्याकरणस्य दर्शनमित्यर्थः। तत्रापि व्याकरणपदेन व्याख्यानोपसंख्यानादिविशिष्टं शास्त्रं व्याकरणपदेन ग्राह्यम्। तस्य दर्शनमित्यत्र कर्तरि षष्ठ्या समासे शास्त्रेण यद् यद् दृश्यते, तत् सर्वमपि दर्शनमेव भवेत्। अधिकरणस्य सम्बन्धत्वेन विवक्षया षष्ठ्यन्तेन समासे तु व्याकरणशास्त्रे यत्परात्मनः तत्सम्बन्धिनो वा दर्शनस्य साधकं तदेव दर्शनं स्यात्। एवं सति उक्तासु व्युत्पत्तिषु यः कोऽपि व्याकरणसम्बन्धी विषयः स सर्वोऽपि दर्शनपदव्यपदेश्यः सिध्यति । अस्यां स्थितौ पञ्चानां वृत्तीनामन्येषां वा प्रकृतिप्रत्ययसन्धिसमासकारकादीनां सर्वेषां दर्शनत्वे न काचिद् बाधाऽऽपतिष्यति। किञ्च येन केनापि वैयाकरणेन दृष्टो व्याकरणे पदार्थो व्याकरणदर्शनपदव्यपदेशो भवेत्, तथा चेदं शास्त्रं व्याकरणदर्शनं कथयितुं शक्यते।

## संदर्भ

1. शुक्लयजुर्वेद 31–18
2. छान्दोग्योव० 3/4/1।
3. वृहदारण्यको 2. 5. 1 9
4. शुक्लयजुः 19–17
5. सांख्यप्रवचनभाष्या प्र० अ० 1 सू० 1